श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चतुरशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुरशीतितमः सर्गः ॥

## अश्वमेधं प्रस्तुवता लक्ष्मणेनेन्द्रवृत्रयोः कथाया उपस्थापनं वृत्रस्य तप इन्द्रस्य विष्णुं प्रति तद्वधार्थमनुरोधः

तथोक्तवति रामे तु भरते च महात्मनि।
लक्ष्मणोऽथ शुभं वाक्यमुवाच रघुनन्दनम्॥ **7.84.1** ॥

अश्वमेधो महायज्ञः पावनः सर्वपाप्मनाम्।
पावनस्तव दुर्धर्षो रोचतां रघुनन्दन॥ **7.84.2** ॥

श्रूयते हि पुरावृत्तं वासवे सुमहात्मनि।
ब्रह्महत्यावृतः शक्रो हयमेधेन पावितः॥ **7.84.3** ॥

पुरा किल महाबाहो देवासुरसमागमे।
वृत्रो नाम महानासीद् दैतेयो लोकसम्मतः॥ **7.84.4** ॥

विस्तीर्णो योजनशतमुच्छ्रितस्त्रिगुणं ततः।
अनुरागेण लोकांस्त्रीन् स्नेहात् पश्यति सर्वतः॥ **7.84.5** ॥

धर्मज्ञश्च कृतज्ञश्च बुद्ध्या च परिनिष्ठितः।
शशास पृथिवीं स्फीतां धर्मेण सुसमाहितः॥ **7.84.6** ॥

तस्मिन् प्रशासति तदा सर्वकामदुधा मही।
रसवन्ति प्रसूनानि मूलानि च फलानि च॥ **7.84.7** ॥

अकृष्टपच्या पृथिवी सुसम्पन्ना महात्मनः।
स राज्यं तादृशं भुङ्क्ते स्फीतमद्भुतदर्शनम्॥ **7.84.8**॥

तस्य बुद्धिः समुत्पन्ना तपः कुर्यामनुत्तमम्।
तपो हि परमं श्रेयः सम्मोहमितरत् सुखम्॥ **7.84.9**॥

स निक्षिप्य सुतं ज्येष्ठं पौरेषु मधुरेश्वरम्।
तप उग्रं समातिष्ठत् तापयन् सर्वदेवताः॥ **7.84.10**॥

तपस्तप्यति वृत्रे तु वासवः परमार्तवत्।
विष्णुं समुपसङ्क्रम्य वाक्यमेतदुवाच ह॥ **7.84.11**॥

तपस्यता महाबाहो लोकाः सर्वे विनिर्जिताः।
बलवान् स हि धर्मात्मा नैनं शक्ष्यामि शासितुम्॥ **7.84.12**॥

यद्यसौ तप आतिष्ठेद् भूय एव सुरेश्वर।
यावल्लोका धरिष्यन्ति तावदस्य वशानुगाः॥ **7.84.13**॥

तं चैनं परमोदारमुपेक्षसि महाबल।
क्षणं हि न भवेद् वृत्रः क्रुद्धे त्वयि सुरेश्वर॥ **7.84.14**॥

यदा हि प्रीतिसंयोगं त्वया विष्णो समागतः।
तदाप्रभृति लोकानां नाथत्वमुपलब्धवान्॥ **7.84.15**॥

स त्वं प्रसादं लोकानां कुरुष्व सुसमाहितः।
त्वत्कृतेन हि सर्वं स्यात् प्रशान्तमरुजं जगत्॥ **7.84.16**॥

इमे हि सर्वे विष्णो त्वां निरीक्षन्ते दिवौकसः।
वृत्रघातेन महता तेषां साह्यं कुरुष्व ह॥ **7.84.17**॥

**त्वया हि नित्यशः साह्यं कृतमेषां महात्मनाम्।**
**असह्यमिदमन्येषामगतीनां गतिर्भवान्॥ 7.84.18॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुरशीतितमः सर्गः॥